# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.-1.2.3** समयः - 11 तः 02 पर्यन्तम्

दिनाङ्कः –15/04/2019 सन्दर्भग्रन्थः – पाराशरस्मृतिः (7-12 अध्यायाः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 अधोलिखितेषु द्वयोः ससन्दर्भान्वयप्रसङ्गपूर्वकं व्याख्यानं विधीयताम्। 10**

(1) मार्जनात् यज्ञपात्राणां पाणिना यज्ञकर्मणि।
चामसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥

(2) येन केन च धर्मेण मृदुना दारुणेन च।
उद्धरेत् दीनमात्मानं समर्थो धर्ममाचरेत् ॥

(3) चत्वारो वा त्रयो वाऽपि यं ब्रूयुर्धर्मपारणाः।
स धर्म इति विज्ञेयो नेतरैस्तु सहस्रशः ॥

**प्रश्नः-2 कस्याप्येकस्य सविस्तरमुत्तरं लिखत। 10**

(1) द्रव्यशुद्धिप्रकरणमालक्ष्य पात्रशुद्धिविषये विवेचयत।

(2) ब्राह्मणस्य ब्राह्मणत्वं कथं भवतीति विविच्यताम्।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 अधोलिखितेषु द्वयोः ससन्दर्भपूर्वकं भावार्थो लेख्यः। 10**

(1) लाङ्गूले पादकृच्छ्रं तु द्वौ पादावस्थिभञ्जने।
त्रिपादं चैव कर्णे तु चरेत् सर्वं निपातने ॥

(2) यदि तत्र भवेत् काष्ठं प्रायश्चित्तं कथं भवेत्।
जपित्वा पावनीं देवी मुच्यते तत्र किल्बिषात् ॥

(3) अमरे समरे वाऽपि दुर्भिक्षे वा जनक्षये।
वन्दिग्राहे भयार्तौ वा सदा स्वस्त्रीं निरीक्षयेत् ॥

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं दीयताम। 10**

(1) पशूनामङ्गभङ्गे किं किं प्रायश्चित्तं तद्विशदतया वर्णयन्तु।

(2) व्यभिचारिमानवस्य प्रायश्चित्तं यथाग्रन्थं प्रतिपादयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 अधोलिखितश्लोकेषु द्वयोः ससन्दर्भप्रसङ्गान्वयपूर्वकं भावार्थं लिखन्तु। 10**

(1) अज्ञानात् भुञ्जते विप्राः सूतके मृतकेऽपि वा।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ।।

(2) यत् त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम्।
ब्रह्मकूर्चं दहेत् सर्वं प्रदीप्ताग्निरिवेन्धनम् ।।

(3) खलयज्ञे विवाहे च संक्रान्तौ ग्रहणे तथा।
शर्कर्यां दानमस्त्येव नान्यत्रैवं विधीयते ।।

**प्रश्नः-6 कस्याप्येकस्य सविस्तरमुत्तरं दीयताम्। 10**

(1) ब्राह्मणादिवर्णानां पापनिवारणं कया रीत्या स्यात्? इति यथाग्रन्थं विविच्यताम्।

(2) सर्वप्रायश्चित्तं कथं स्यादिति ग्रन्थोक्तदिशा लिख्यताम्।

## अन्वितयः १-३

**प्रश्नः-7 अधोलिखितप्रश्नेषु दशप्रश्नानामेकद्विवाक्येनोत्तराणि लिखत। 10**

(1) अष्टवर्षा कन्या का भवेत्?
(2) ''जातेवदाः'' इत्यस्य कोऽर्थः का च विभक्तिः ?
(3) रजस्वलानारी प्रथमदिने का भवेत्?
(4) पापं कृत्वा केभ्यः निवेदयेत्?
(5) के त्रयः नामधारकाः?
(6) कीदृशोऽपि द्विजः पूज्यः?
(7) दण्डस्य किं लक्षणम्?
(8) बलिवर्वहत्या कतिविधा?
(9) गोहत्यापापी किं चरेत्?
(10) भोजनग्रासः कीदृशो भवेत्?
(11) चातुर्वर्णस्य नारीणां किं करणीयम्?
(12) किन्नाम पञ्चगव्यम्?
(13) क्षत्रियात् शूद्रकन्यायां जातः सुतः किन्नाम ?
(14) अनिकृच्छ्रव्रतं लक्षणं किमस्ति?
(15) अग्नेयस्नानस्य लक्षणं किमस्ति?